श्री षण्मुख षट्पदी स्तवः

श्री षण्मुख षट्पदी स्तवः

मयूराचलाग्रे सदारं वसंतं
मुदारं ददानं नतेभ्यो वरांश्च |
दधानं करांभोजमध्ये च शक्तिं
सदा षण्मुखं भावये हृत्सरोजे || 1 ||

गिरीशास्यवाराशिपूर्णेंदुबिंबं
कुरंगांकधिक्कारिवक्त्रारविंदं |
सुरेंद्रात्मजाचित्तपाथोजभानुं
सदा षण्मुखं भावये हृत्सरोजे || 2 ||

नतानां हि राज्ञां गुणानां च षण्णां
कृपाभारतो यो द्रुतं बोधनाय |
षडास्यांबुजातान्यगृह्णात्परं तं
सदा षण्मुखं भावये हृत्सरोजे || 3 ||

पुरा तारकं यो विजित्याजिमध्ये
सुरांदुःखमुक्तांश्चकाराशु मोदात् |
तमानंदकंदं कृपावारिराशिं
सदा षण्मुखं भावये हृत्सरोजे || 4 ||

शराणां वने जातमेनं हि बालं
यतः कृत्तिकाः पाययंति स्म दुग्धं |
ततः कार्तिकेयं वदंतीह यं तं
सदा षण्मुखं भावये हृत्सरोजे || 5 ||

हरंतं च बाढं तमो हार्दगाढं
गवानाद्यया चातिमोदेन लीढं |
सुरेंद्रस्य पुत्र्या च गाढोपगूढं
सदा षण्मुखं भावये हृत्सरोजे || 6 ||

इयं षट्पदी यस्य वक्त्रारविंदे
विहारं करोत्यादरान्नित्यमेव |
षडास्यः कृपातः समस्ताश्च विद्या
वितीर्याशु तस्मै स्वभक्तिं ददाति || 7 ||

इति श्रीशृंगेरिजगद्गुरु श्रीसच्चिदानंद शिवाभिनवनृसिंहभारती स्वामिभिः विरचितं श्री षण्मुख षट्पदी स्तवः |